मंतथैवच ॥ अमृतारव्याहिसाचांद्रिसप्तमीसारसप्तकाः ॥ १० ॥ मध्यमार्गेस्थितासौम्यानाडीतस्याग्रपृष्ठतः ॥ सौम्ययाम्यगतंज्ञेयंनाडिकानांत्रयंत्रयं ॥ ११ ॥ क्रूरायाम्यगतानाड्यः सौम्याः सौम्यदिगाश्रिताः ॥ मध्यनाडीचमध्यस्थग्रहस्तत्पफलप्रदा ॥ १२ ॥ एकनाडीग्रहाद्याद्याग्रहाः क्रूराः शुभायदि ॥ ततोनाडीफलंवाच्यंशुभंवायदिवाशुभं ॥ १३ ॥ ग्रहाःकुर्युर्यदावातंमहावातर्क्षनाडिका ॥ वायुनाडीगतावायुंदाहिन्यादाहदायकाः ॥ १४ ॥ सौम्यानाडीगतामध्यानीरस्थामेघवाहकाः जलायोदृष्टिगाश्चेद्रनाडिगाचानिदृष्टिदा ॥ १५ ॥ एकोपितत्फलंधत्तेस्वनाडीसंस्थितोग्रहः ॥ भूस्थतः सर्वनाडिषुधत्तेनाडीफलंक्रवं ॥ १६ ॥ प्राग्दृक्कालेसमायातेआर्द्रार्केसंगमितरवौ ॥ नाडीवेधसमातेजलयोगंवदाम्यहं ॥ १७ ॥ यत्रनाडीस्थितश्चंद्रस्तत्ररुजाःखेचरायदि ॥ क्रूरसौम्यैर्विमिश्राश्चतद्दिनेदृष्टिरुत्तमा ॥ १८ ॥ एवंकृष्णांशसंयोगोजायतेयदिखेचरैः ॥ तत्रकालेमहादृष्टिर्यातस्याशंकेशशी ॥ १९ ॥ केवलैः सौम्यपापैर्वाग्रहैर्विद्धोयदाशशी ॥ तदादित्युच्छगानीयंदुर्दिनंभवनिश्चवं ॥ यस्यग्रहस्यनाडिस्थश्चंद्रमास्तद्वेधगश्च ॥ दृष्टयुक्तःकरोत्यंभोयदिक्षीणोनजायते ॥ २३ ॥ पीयूषनाडीगश्चंद्रस्तत्ररेखराः शुभाः शुभाः ॥ त्रिचतुःपंचपानीयंदिनान्येकत्रसप्तकं ॥ २२ ॥ एवंजलाख्यनाडीस्थेचंद्रमिश्रग्रहान्विते ॥ दिनार्द्धदिवसंपंचदिनानिजायतेजलं ॥ २३ ॥ नीरनाडीस्थितश्चंद्रस्तत्ररेखैःपूर्ववद्ग्रहैः ॥ यामंदिनार्द्धकंत्रीणिदिनानिजायतेजलं ॥ २४ ॥ अमृतादित्रयेयत्रसप्तवंनियत्ररेखचराः ॥ तत्रदृष्टिक्रमाज्ञेयाधृत्यर्कसप्तवासराः ॥ २५ ॥ सौम्यनाडीगताःसर्वेदृष्टिरास्तदिनत्रयं ॥ शेषनाडीमहावातदुष्टदृष्टिप्रदाग्रहाः ॥ २६ ॥ निर्जलंजलदानाडीभवद्योगेशुभाधिके ॥ क्रूराधिकसमायोगेजलदापिनदाहका ॥ २७ ॥ याम्यनाडीगताःक्रूराःअनादृष्टिप्रसूचकाः ॥ शुभयुक्ताजलांशस्थास्तन्निदृष्टिप्रदायकाः ॥ २८ ॥ एकनाडीसमारूढोचंद्रमाधरणीसुतो ॥ यदातत्रसवेज्जीवस्तदाजलमयीमही ॥ २९ ॥ बुधशुक्रौयदैकस्थेगुरुणाचसमन्वितौ ॥ चंद्रयोगेतदाकाले जायतेदृष्टिरुत्तमा ॥ ३० ॥ जलयोगेसमायातेयदाचंद्रोसितोग्रहो ॥ क्रूरेर्दृष्टेयुतोवापितदामेघोल्पदृष्टिदः ॥ ३१ ॥ उदयास्तमिदंमार्गेवक्रयुक्तेचसंक्रमे ॥ जलनाडीगताः खेटाः महादृष्टिप्र

॥ श्रीराम् ॥
॥ २१ ॥

175
1918

दायकाः ॥ ३२ ॥ प्राग्दृक्षिशीतकरोभृगुपुत्रासप्तराशीगतःशुभदृष्टः ॥ सूर्यसुतान्नवपंचमगोवासप्तमगश्चजलागमनाय ॥ ३३ ॥ इतिसप्तनाडिचक्रं ॥ चक्रंसांवत्सरंवक्ष्येयदुक्तंकालयामले ॥ येनविज्ञायतेसम्यग्वर्षेवर्षेशुभाशुभं ॥ १ ॥ द्वादशारलिखेच्चक्रंतत्रमेषादिराशयः ॥ संस्थाप्याःक्रमयोगेनमीनांताःसृष्टिमार्गतः ॥ २ ॥ तत्रचक्रेसमाख्यिरव्यमेषादिराशिर्मार्गतः ॥ प्रश्नवाद्यदृष्टमंकंकंषष्टिंपंचप्रवर्तनैः ॥ ३ ॥ एवंराशिस्थितंयंत्रंसंवत्सरंवर्त्तमानजं ॥ तद्राशिस्थंफलंविद्यायत्किंचिद्वार्षिकंभवेत् ॥ ४ ॥ चैत्रेयाप्रतिपच्छुक्लात्तस्याकालप्रवेशयेत् ॥ एतद्विलोकयेच्चक्रंकालज्ञानविनिश्चये ॥ ५ ॥ तत्रसप्तग्रहान्यस्यराशयोयत्रसंस्थिताः ॥ वर्षराशेर्विचिंत्यारुंरेखरुजानगताःग्रहाः ॥ ६ ॥ उपचयगताःक्रूराःसौम्याःछिद्रांतवर्जिताः ॥ ग्रहैरेखाप्रदाज्ञेयामित्रमध्यग्रहगताः ॥ ७ ॥ सर्वर्क्षद्विघ्नफलंदत्तेस्वाच्चत्रिघ्नंतथैवच ॥ फलार्धंशत्रुगेहस्थानीचस्थानिष्फलोग्रहः ॥ ८ ॥ एवंरेखाप्रमाणेनवर्षविशेषकामताः ॥ ज्ञातव्यादर्शकंद्रेणवर्षेवर्षेप्रयत्नतः ॥ ९ ॥ एवंवर्षफलंप्रोक्तंचैत्रमासाद्यवासरात् ॥ आषाढेकार्त्तिकेप्येवंजलधान्यंविचिंतयेत् ॥ १० ॥ नानादेशपुरग्रामफलंभिन्नंप्रदृश्यते ॥ तस्मात्तत्कारणंवक्ष्येनजानंतिसाधकाः ॥ ११ ॥ दृशादिराशिनाथस्थोरेखादायकोग्रहः ॥ मित्रोदासीनशत्रुत्वफलंभिन्नंकरोतिसः ॥ १२ ॥ मित्रोद्विघ्नफलंदत्तेसमसाम्यंकरोतिसः ॥ शत्रुःसमहरोज्ञेयःसर्वदाकालचिंतकैः ॥ १३ ॥ एवंविचारकर्त्तव्याकालविशेषकाबुधैः ॥ तथापानियधान्यानांसस्यकोलविचिंतयेत् ॥ १४ ॥ [illegible]त्सरचक्रं ॥ १०० ॥ रुजानचक्रंप्रवक्ष्यामियदुक्तंलोपरागमे ॥ येनविज्ञायतेसम्यक्रुजोनरुजोनशुभाशुभं ॥ १ ॥ रुजानरोजापिप्रभावेनराज्ञापीडाप्रजायते ॥ तस्मादपीडितंरुजोनरुजानव्यंसर्वदाबुधैः ॥ २ ॥ रुजाननामोद्भवराशिंहत्वाद्वादशारके ॥ राशिमंडलकंन्यस्यवाममार्गेणसंस्थितं ॥ तत्रनवग्रहरुजाप्तामासचंद्रश्वराशिगः ॥ ३ ॥ तेषांविलोकनंविद्यारुजानराशिगतंयथा ॥ ४ ॥ तृतीयैकादशेपादेद्विपादंव्यामबंधुगे ॥ त्रिकोणस्थेग्रहेमृत्युस्तेपूर्णपश्यतिखेचराः ॥ ५ ॥ शून्यकरद्विकत्वाराःपंचक्रूरग्रहामताः ॥ शेषंचतुष्टयंसौम्यंमासंदृश्वापिपंचमः ॥ ६ ॥ एवंपंचग्रहाःक्रूरापंचसौम्यास्तथैवच ॥ शेषाशुभाशुभादृष्टिः रुजा

रुज्ञानफलंवदेत्॥७॥एकैकग्रहजादृष्टिःपूर्णपादचतुष्टयं॥पंचमेलापकेतेषांपादानांविंशतिर्भवेत्॥८॥तत्रविंशोपकाः
तेषांसौम्यक्रूरग्रहोद्भवाः॥एवंत्रसाधयेद्दृष्टियुग्मसंदृशुभाशुभं॥बह्विकेकाननाशेषाजायतेदृक्शुभाशुभा॥तत्रविं
शोपकास्तस्यरुज्ञानंबालंविनिर्णिये॥१०॥एवंदेशपुरग्रामबलंयत्रशुभादिकं॥तत्ररुज्ञानेस्थितोराजादुष्टरिष्टैर्निपी
ड्यते॥११॥रुज्ञानबलभावनस्वबलस्यबलोदयः॥शत्रुसैन्यंक्षयंयातियावत्रुज्ञानेशुभस्थिताः॥१२॥एतानिसर्वचक्रा
णिज्ञात्वायुद्धंसमारभेत्॥जयंदिहनसंदेहशक्रतुल्येपिभूभुजि॥इतिश्रीनरपतिजयचर्यायांस्व

रोदयेचतुराशितिचक्राणि॥९०॥९८७॥अथातः
संप्रवक्ष्यामिभूबलानिसमासतः॥चतुर्विधेपिसंग्रा
मेयद्दृशाद्विजयीनृपः॥१॥नैर्त्याद्याईशवायव्यरक्षोग्नी
इंधनाधिपे॥वारुणेदक्षिणेरुद्रेवायुरक्षस्तथानिके॥
२॥उड्डिशभूरियंसंख्याप्रोक्तायाब्रह्मयामके॥चतु
र्विधेपिसंग्रामेजयदाराष्टदक्षिणे॥३॥इत्यकुड्डीशभू
मिः॥१॥वायुरुद्राग्निनैर्ऋत्ययाम्येनोयोत्तराध्वजे॥
अग्निरुद्रानकेरक्षाश्चैत्राद्यैभ्रमणंभवेत्॥२॥ए
वंमासोदयेयत्रतत्ररुज्ञापृष्टदक्षिणे॥इयंजलंधरीभू
मिःसंग्रामेजयदाभवेत्॥५॥इतिजालंधरिभूमिः॥
३॥पूर्णारुज्ञांकथयिष्यामिपूर्णपिपाद्विनर्गतः॥द्वंद्व
युद्धेनयादुर्गेधामाद्यैभुक्तिरत्रच॥६॥पूर्वोत्तरयम

॥श्रीराम॥
॥३२॥

173
1918

शाकेवार्यकोनेजले॥यथादिनेतथारात्रौपृष्टदक्षिणगोजयेत्॥७॥इतिपूर्णाभूमिः॥३॥इंद्र
जलेयमेसौम्यमघादिभ्रमणत्रयं॥रविसंक्रमनेमासाज्ञातव्यायत्रसंस्थिताः॥८॥तत्ररुज्ञाभ्र
मणंस्वयंचतुर्नाडीदिगष्टके॥पृष्टदक्षिणगायुद्धंकामाख्याद्दिक्षयंकरी॥९॥इतिकाम्याख्या
भूमिः॥४॥शाकोत्तरजलेयाम्यनैर्ऋत्यादिभ्रमणत्रयं॥मासास्यगतायस्यतस्माच्चभ्रमणक्रमः
॥१०॥रुद्रार्कनाडिकाभुक्तिरुदयेयपुनःपुनः॥एवंकोल्लापुरीभूमिपृष्टदक्षिणगाशुभा॥११॥
इतिकोल्लापुरी॥५॥रुद्रजलाग्नेसौम्यचनैर्ऋत्येंद्रानिकेयमे॥ईशाबुपावकेसौम्येचत्रादि
भ्रमणंक्रमात्॥१२॥एकाविंशमहाभूमिरेषाकेयमादिमंडले॥पृष्टदक्षिणगायुद्धंजयदानात्र
संशयः॥१३॥इत्यकविंशाभूमिः॥६॥चकेद्वादशपत्रेन्येमघाद्यावाममार्गगाः॥यत्ररुज्ञा
तत्रतःसर्वमुक्तिःमार्द्धघटिद्वयं॥१४॥महामारीसमाख्याताभूबलानांबलोत्कटा॥समरेजयदाप्रोक्तापृष्टदक्षि
णसंस्थिता॥१५॥इतिमहामारिभूमिः॥७॥चैत्रादिपूर्वतस्तेषांभ्रमःकाष्ठाचतुष्टये॥मालिघ्न्याख्यामहाभूमिज
यदापृष्टदक्षिणे॥१६॥इतिमालिघ्नीभूमिः॥८॥विल्वोमापूर्वतोमासाश्चैत्रादिकचतुष्टये॥त्रहाराःसव्यमार्गेणमासरुज्ञाना
द्विगण्यते॥१७॥चातुरंगेकवीकोटेजयदापृष्टदक्षिणे॥क्षेत्रपाल्लीमहाभूमिःभूबलानांबलीयसी॥यद्बलद्वल्लयुक्तानिभू
बलान्यबलानिच॥एतद्बलरहितानिवृथाचतुराशीतिचक्राणि॥१९॥इतिक्षेत्रपाल्लीभूमिः॥९॥पावकेसौम्यनैर्ऋत्ये
इंद्रवायुयमेहरौ॥जलजाग्न्युत्तररक्षस्तूर्वत्रैत्रादिमासतः॥२०॥वंशजेयमहाभूमिरित्यवंशक्षयंकरी॥दक्षपृष्टस्थितायु
द्धंजयदानात्रसंशयः॥२१॥इतिवंशजाभूमिः॥१०॥दानवानांवधार्थायेरुद्रारुद्रेणनिर्मितः॥तंरुद्रंसंप्रवक्ष्यामिजया
यविजयार्थिनां॥२२॥दशशीर्षंदशभुजंदशोपचास्यंत्रिनेत्रंचजगाधरं॥महाप्रेतासनारूढंत्रिशूलायुधधारिणं॥२३॥इंद्रवायुयमे
याद्यैवारुणेग्नीद्वराक्षसे॥प्राच्यांतकजलेसौम्येचैत्रमासाद्यसंक्रयः॥२४॥दिनंदिनार्द्धयामंचप्रहरार्द्धंतदग्रतः॥एवं

भुक्तिप्रमाणेनपृष्टदक्षिणगोजयी॥२५॥इतिरुद्रभूमिः॥११॥सप्तेरखांकितचक्रेरुद्रादीमासभादितः॥सव्यमार्गणतेर
याअष्टाविंशतिसंख्यया॥मासर्क्षादिनभंज्ञात्वातस्मात्तत्कालिकंचभं॥रेखायामुदयाद्भूमिः सपादघटिकाद्वयं॥२६॥
मासर्क्ष्यमासचंद्रर्क्षदिनंदुर्दिनभंतथा॥नाडिकाभ्रमकोयत्रतत्रतात्कालसंज्ञकः॥२७॥मासेंदुर्मासभानुश्चदिनंद्वेर्दि
नभास्करः॥घटिकेंदोर्घटिभानुस्त्रिपंचर्क्षंसदाभवत्॥२८॥पृष्टदक्षेरविंकुर्याद्वामाग्नेतुनिशाकरं॥जेयदिहनसंदेहो ए
कोपिशतमाहवे॥५॥३०॥शक्तिरूपीस्थितःश्चंद्रःकालरूपोदिवाकरः॥चंद्रसूर्योत्तरालेनकालरेखाविधीयते॥३१॥
कवोकोटेतथाद्वंद्वेचातुरंगमहाहवे॥लंघनीयानसायोधैः कालरेखार्कसंमुखी॥३२॥इतिकालरेखाभूमिः॥१२॥पाव
काद्वादशारेखाघटीपंचकमोदयः॥उदयाद्वाममार्गेणभ्रमोज्ञेयोनिरामये॥३३॥त्रयोदशगताभूमिः साकार्यापृष्टद
क्षिणे॥तत्तोजयमवाप्नोतिसंग्रामेपिचतुर्विधे॥३४॥इतिविरामयभूमिः॥१३॥वत्स्रदिकोणगावामंमासायामेषुसव्य
गाः॥पृष्टदक्षस्थितायुद्धेजयदाजयलक्ष्मिका॥१॥इतिजयलक्ष्मिका॥१४॥वारुणाद्वामगामासाचैत्राद्यादिकृचतुष्ट
ये॥उदयस्तेनमार्गेणप्रहराद्वंदिशाष्टके॥३५॥महालक्ष्मितिविख्यातायात्राक्तात्रह्मयामले॥यस्यपृष्टगतायुद्धेतस्य
भंगोनविद्यते॥३७॥इतिमहालक्ष्मीभूमिः॥१५॥अपसव्यगतामासापूर्वादिकृचचतुष्टये॥दक्षपृष्टेजयोयुद्धेजयभू
मिरियंमता॥३८॥इतिजयभूमिः॥१६॥इंद्रवह्निजलसौम्यनैरृत्येंद्रयमोत्तर॥रुद्रवातांतिकेरुद्रेचैत्रमासाद्ययंक्र
मः॥३९॥एषासाविजयाभूमियुद्धेदक्षिणभागगा॥जयदानात्रसंदेहोचातुरंगमहाहवे॥४०॥इतिविजयाभूमिः॥१७॥
षट्कोणमाग्नेरेखाचक्रंपूर्वापरसमन्वितं॥षट्कंककर्कादिकंप्राच्यांमकराद्यंचपश्चिमे॥४१॥पूर्वाग्निवायुरुद्रेचनैरृत्ये
वारुणानले॥घटीपंचप्रमाणेनककर्कादौभ्रमणंक्रमात्॥४२॥तोयवातााग्निनैरृत्यभूक्लिनीद्दिशिक्रमात्॥मकरादौ
भ्रमंषट्कंप्राक्तेषाभूमिभैरवी॥४३॥जयदादक्षिणेभागेमृत्युदावामभागगा॥संमुखीभंगदायुद्धेपृष्टस्थासंधिकारका
॥४४॥इतिभैरवीभूमिः॥१८॥त्रयोदशगतावाल्याविशेषापृष्टतोरणे॥भ्रंशनिशस्त्रसंघातंसिंहस्येवमृगायथा॥४५॥

॥श्रीराम्॥
॥३२॥

129
1918

अर्धयामोदयेबालासन्मुखीजयदामता॥तदूर्ध्वंवामगाश्रेष्ठापृष्टगानिशिसाशुभा॥२॥४६॥इतिबालभूमिः॥१९॥
मेषादिविन्यसेच्चक्रंद्वादशारस्यसर्वतः॥पूर्वोदयतःसव्यभ्रमःपंचघटीमतः॥४७॥इयंयोगीश्वरीभूमिर्जयदापृष्ट
दक्षिणे॥अहोरात्रेणसासर्वचक्रंभ्रमतिसर्वदा॥४८॥इतियोगीश्वरीभूमिः॥२०॥इंद्रनैरृत्यसोम्याग्नितोयरौद्रा
तिकनिके॥घटीद्वयप्रमाणेनदिनार्द्धंभ्रमणंक्रमात्॥४९॥एवंमेवापरान्हेपिचंडीभ्राम्यास्तिसर्वदा॥यस्यदक्षिण
गायुद्धेतस्यभंगोनविद्यते॥५०॥इतिचंडीभूमिः॥२१॥उदयात्पूर्वसव्ययामेयामेदिगष्टके॥यामभूमिर्भवत्येवंजयदा
वामसन्मुखी॥५१॥इतिजयदाभूमिः॥२२॥ईशाद्यावामतोयातियामार्द्धककुभाष्टके॥भंभुकारव्योभ्रमत्येवंजयदा
वामसन्मुखी॥५२॥इतिभंभुकाभूमिः॥२३॥त्रिरेखाऊर्ध्वगाः कृत्वानिर्यगाश्चतथापुनः॥पूर्वारेखादितोन्यस्यमे
षाद्याः सर्वमार्गगा॥५३॥यत्ररात्रौस्थितश्चंद्रस्तंदेउन्नियतोरविः॥रविःपृष्टशशीचाग्रेजयदाकर्तरीसदा॥५४॥
इतिकर्तरीभूमिः॥२४॥चैत्राद्युत्तरतोमासाद्वादशारेचसृष्टिगाः॥यत्रस्थानगतोयातिपंचपंचघटिक्रमात्॥५५॥
भंगदास्रष्टिगाप्रोक्तामृत्युदावामतस्थिता॥जयदादक्षिणेदक्षाग्रेशार्द्धलीसमरेस्थिता॥५५॥इतिशार्दूलीभूमिः॥
२५॥वाममार्गेणपूर्वादियामार्द्धनदिगष्टके॥वामाग्रेजयदाप्रोक्तासिंहलीसमरेस्थिता॥५७॥इतिसिंहलीभूमिः
॥२६॥तिथ्यर्धादुदयंयातिनाडिकाषट्भ्रमाणतः॥पूर्वयाम्यादिकेसौम्यब्रह्मस्थानंतथैवच॥५८॥तन्नीभूमिरितिख्या
ताजयदापृष्टदक्षिणे॥ब्रह्मस्थानोदयंमत्वासेन्ययोरुभयोरपि॥५९॥इतितन्नि॥२७॥दक्षिणाद्वारतोयातिचैत्रा
दिदिक्चतुष्टये॥पृष्टदक्षिणगाप्राव्यामहामायाचसामता॥६०॥इतिमहामाया॥२८॥दक्षिणाद्वामतोयातिचै
त्रादिदिक्चतुष्टये॥दक्षपृष्टस्थिताप्रव्याभूमिरेषामहेश्वरी॥६१॥इतिमहेश्वरी॥अर्धयामभ्रमेत्सव्यंशक्रस्थ
नदिगष्टके॥पृष्टस्थाजयदायुद्धेदेवकोटिरियंमता॥इतिदेवकोटिः॥२९॥इंद्रादियुगभक्तिः सव्यमार्गेदिगष्ट
के॥दक्षिणेजयदाप्रोक्ताशिवाभूमिर्महाहवे॥६३॥इतिशिवा॥३०॥आदौतिथित्रयंरौद्रंत्रयंचैवजलेभवत्॥

तनश्चैकायमाषायामग्निभागेतिथिद्वयं॥ ६४॥ वायोसोम्येतथैकैकापूर्वस्यांनुतिथित्रयं॥ नैऋत्यैकाहतेनाष्टशक्तिभूमिर्जयप्रदा॥ ६५॥ इतिशक्तिः॥ ३१॥ चैत्रादिवायुतोमासाः संहारेणदिगष्टके॥ पुनःपश्चिमतःशेषाश्चतुर्दिक्क्रमेणच॥ ६६॥ पृष्ठदक्षिणगाश्रेष्ठाःभंगदावामसंमुखाः॥ इतिधूम्रा॥ ३२॥ वह्निशक्रोत्तरावायोयमरुद्रांबुपावके॥ नैऋत्येंद्रयमेतोयेचैत्रादिभ्रमणंमतं॥ पृष्ठरुजाजयदानित्यमन्यत्रैषानशोभना॥ ६८॥ इयंमाणाख्याभूमिर्युद्धकालेमहाबला॥ इतिमाणा॥ ३३॥ चैत्रादिमासषट्केनपूर्वभागेहतेरयं॥ शेषषट्केनवारुण्यांपृष्ठेभव्यावराटिका॥ ६९॥ इतिवराटिका॥ ३४॥ वह्निहतःसव्यमार्गेणमासाश्चैत्रादिकोणगाः॥ पृष्ठदक्षिणगायुद्धेत्रिमुंडाजयदामता॥ ७०॥ इतित्रिमुंडा॥ ३५॥ वायुहतःसव्यमार्गेणमासार्द्धकर्त्रीभंप्रति॥ संमुखीजयदाप्रोक्तामत्सरीयंमहाहवे॥ ७१॥ इतिमत्सरी॥ पूर्वहतःसव्यमार्गेणवरसंख्याघटीक्रमः॥ पृष्ठदक्षस्तथाश्रेष्ठाधर्मभूमिरियंमता॥ ७२॥ इतिधर्मभूमिः॥ द्वारशोरुद्रहतःसव्यैत्रादिभ्रमणंक्रमात्॥ वामाग्रसंस्थितायुद्धेमृतारख्यामृत्युकारिका॥ ७३॥ इतिमृतारख्या॥ चंद्रवायुयमरुद्रजलाग्निशशिराक्षसे॥ यामोदयाभवेद्भूमिर्दृष्टिपृष्टजयप्रदा॥ ७४॥ इतिदृष्टिः॥ ३९॥ चैत्राद्याःपूर्वतोमासाःवामगास्तेदिशाष्टके॥ पुनर्मार्गादितोमासाःशेषाःकाष्टचतुष्टये॥ ७५॥ क्षयाभूमिर्भवत्येवंदक्षिणेनतथाक्षया॥ क्षयावामाजयादक्षेक्षयदानात्रसंशयः॥ ७६॥ इतिक्षया॥ ४०॥ तुर्यांतुर्यांदिशंयातिवामंचैत्रादिपूर्वतः॥ सप्तमेदक्षपृष्ठरुजादुर्मतीयंजयप्रदा॥ ७७॥ इतिदुर्मती॥ ४१॥ पूर्वोत्तराग्निनैऋत्ययमतोयानिलेशिवे॥ प्रहरार्द्धंत्र्यासातुपृष्ठरुजाप्रवरामता॥ ७८॥ इतिप्रवरा॥ ४२॥ पूर्वोत्तरदिशःशुक्लेकृष्णेतुकज्जलेशयाः॥ जयदापक्षभागेनगौरीकालीक्रमेणच॥ ७९॥ इतिगौरी॥ ४३॥ वह्निहतःसव्यमार्गेणयामभागेदिगष्टके॥ नारद्यक्षयाभूमिर्जयदापृष्ठदक्षिणा॥ ८०॥ इतिनारद्यां॥ ४३॥ पूर्वोत्तरजलेयाम्येवह्निशेवायुराक्षसे॥ यमेंद्रसोम्यतोयेचचैत्रादिमासभागगा॥ ८१॥ इयंभूमिबलाख्याचसमुखीवामगाशुभा॥ भंगदादक्षिणेपृष्ठेयुद्धकालेनसंशयः॥

॥श्रीराम॥
॥३६॥

॥इतिबलाख्या॥ ४४॥ मेषादिद्वादशेरेचवाममार्गेणभूचरी॥ खेचरीदक्षमार्गेणभ्रमोभवतिसर्वदा॥ ८२॥ वक्ररुजाभूचरेचक्रेशीघ्रारेचरगाग्रहाः॥ भूचरादक्षपृष्ठरुजारेचरावामसन्मुखा॥ ८४॥ भूचररुजायेजयदारेचराश्चेवयायिनः॥ सौम्यासौम्यविभागंतुविज्ञायफलमादिशेत्॥ ८५॥ इतिभूचरीखेचरीभूमिः॥ ४५॥ पूर्वाग्नेपावकेकोणेपरान्हेवायुगोचरे॥ इयंगुह्याख्यकाभूमिर्जयदापृष्ठदक्षिणे॥ ८६॥ इतिगुह्या॥ ४६॥ वह्न्यासादिचैत्रांतेद्वादशारेचसव्यगा॥ जयदादक्षिणेभागेद्वादशीभूमिरुत्तमा॥ ८७॥ इतिद्वादशीभूमिः॥ ४७॥ आग्नेयाकोणतोवामंपूर्णिमादितिथिक्रमात्॥ सार्द्धदिनत्रयंभद्रावारुण्यांसार्द्धपंचकं॥ ८८॥ रुजमुखीवामगावर्ज्यायात्रायांसमरेतथा॥ पुरग्रामग्रहादिनांप्रवेशेशुभमिच्छता॥ इंद्रवह्निशयाम्येचनैऋत्येंद्रयमजले॥ याम्योत्तरेनिकेचैवभ्रमश्चैत्रादिमासतः॥ ९०॥ जयदापृष्ठदक्षरुजाभंगदावामसंमुखी॥ कबलेयंमहाभूमियुद्धेचैवचतुर्विधे॥ ९१॥ इतिकबलाभूमिः॥ ४८॥ इंद्रश्चंद्राग्निनैऋत्यायाम्यावायुरुद्रगाः॥ नैऋत्यांबुनिलेसौम्यरुद्रेंद्राग्नियमाधिपे॥ ९२॥ प्रतिपदादिभ्रमेतेषांजयपृष्ठदक्षिणे॥ त्रैलोक्यविजयाभूमिर्बभूबलानांबलोत्कटा॥ ९३॥ इतित्रैलोक्यविजयाभूमिः॥ ४९॥ वारोन्द्रपूर्वदिग्भागेततःसव्यनमद्गगः॥ यत्रस्यातत्रकालस्यात्पाशस्तस्यापिसन्मुखः॥ दक्षिणरुजःशुभःकालःपाशोवामदिग्आश्रयः॥ यात्रायांसमरश्रेष्ठस्तत्रान्यत्रनशोभनः॥ ९५॥ इतिकरालिका॥ चैत्राद्याःपूर्वतोमासावामगादिकचतुष्टये॥ तत्रस्थानत्रतोयातियामार्द्धनदिगष्टके॥ भंगदापृष्ठदक्षेचजयदावामसन्मुखा॥ इयंकरालिकाभूमिः संग्रामेशत्रुनाशिनि॥ ९७॥ इतिकरालिकाभूमिः॥ मध्येवात्यक्रमेणेवपूर्वतोवामभागगाः॥ यामार्द्धमुदयंयातिसर्वकालेदिगष्टके॥ ९८॥ बात्याद्योदयातुबात्यानांमध्यरुजानांतुमध्यगा॥ वडवेयंमताभूमिः शत्रुनाभयकारिणी॥ ९९॥ इतिवडवाभूमिः॥ ५२॥ चैत्राद्याःपूर्वतोवामंभ्रमणंदिक्चतुष्टये॥ संमुखीजयदाप्रोक्ताभूमिरेषापराजिता॥ १००॥ इत्यपराजिता॥ नैऋत्याग्निभ्रमोवामेतूर्येतूर्यदिगष्टके॥ चैत्रादिमासगारौद्रीजयदा

181
19718

पृष्ठदक्षिणा॥१०३॥इतिरौद्री॥५४॥उदयाच्चुदयंयावद्दक्षिणस्थोजयीभवेत्॥तदूर्ध्वंचोत्तरस्यांतुशिश्वग्निरियंमता॥१०२॥इतिशिश्वग्नि०॥५५॥पूर्वतोवाममार्गेणघटीपंचदिगष्टक॥अभेद्यजयदाप्रोक्तासन्मुखीसमरेसदा॥१०३॥अभेद्ययंभूः॥५६॥द्वादशारघटीपंचपूर्वतोवाममार्गगाः॥जयदावामपृष्टस्थादहनीभूमिराहव॥१०४॥इतिदहनी॥५७॥वह्न्यादिचैत्रतोमासाःसव्यमार्गेणकोणगाः॥पंचनाडिश्रमत्येवंजितपृष्टजयप्रदा॥इतिजिताभूः॥५८॥द्वादशारेषुतोवामंचैत्रादेवसंस्थिता॥तत्रतोघटिकापंचसव्यमार्गेगतिर्मता॥१०६॥जयदादक्षिणेभागेमृत्करान्यत्रसंस्थिता॥प्रोक्ताबहुबलाभूमिःभूबलानांबलोत्कटा॥१०७॥इतिबहुबलाभूः॥५९॥अष्टारेवाममार्गेणन्यस्यवर्णाष्टकंक्रमात्॥भ्रमणसृष्टिमार्गेणयामार्द्रमुदयोभवेत्॥१०८॥योद्वनामदिनेवर्गेपृष्टदक्षिणतःशुभा॥सर्वकालानलाभूमिःईंद्वयुद्वेजयावहा॥१०९॥इतिवर्ग०॥दिनमध्यस्थनाड्यंकाकपालस्थदिवाकरे॥नश्येद्यायीजयीस्थायीभूमिरेषाकपालिका॥११०॥इतिकपालि॥६१॥पूर्वान्हेपावकेकोणपरान्हेवायुकोणगाः॥दक्षपृष्टस्थितामूमिरेषाचैवनिलानिला॥१११॥इतिनिलाभूमिः॥६२॥दक्षपृष्टरवेर्बिंबेजयार्यरणमूर्द्धनि॥चंद्रबिंबततारात्रौपुरोवामेचशोभने॥११२॥इतिचंद्रसूर्यभूमिः॥६३॥दक्षपृष्टस्थितासोम्याःक्रूरावामाग्रसंस्थिताः॥संग्रामेजयदाप्रोक्तामिश्रामिश्रफलप्रदा॥११३॥इतिग्रहभूः॥६४॥भास्करोयत्रतिष्ठेद्वादशारेयसव्यतः॥साराशिर्दक्षपृष्टस्थासंग्रामेजयदामता११४॥इतिराशिभूः॥सूर्यराश्याहितःसव्यलग्नतत्कालसंभवं॥पृष्टदक्षिणगंहंतायुद्धेनसंशयः॥११५॥इतिलग्नभूः॥६६॥राहुकालानलेचक्रेज्ञात्वाचंद्रदिवाकरौ॥वदनाद्यंगभेदेनकथयिष्यामिभूबलं॥राहुवक्रेस्थितश्चंद्रःपृष्टभागेजयप्रदः॥गुह्यसंपुटगायुद्धेवामोग्रेचजयावहः॥११७॥कपालपुच्छयोश्चंद्रोवामभागेजयप्रदः॥भानुःसर्वत्रसर्वांगजयदःपृष्टदक्षिणे॥११८॥इतिराहुकालानलभूः॥अकाराद्याःस्वराःपंचनंदादितिथिषुक्रमात्॥सव्यमार्गोदयात्

॥श्रीराम॥
॥३५॥

183
1918

स्तेचपंचस्थानेषुसर्वदा॥११०॥ततस्तिथ्यादिनोभुक्तिःप्रत्येकमृतुनाडिकाः॥दक्षपृष्टेचजयदावामाग्रेमृत्करायका॥मध्यभागादयंमृत्युःसनयोरुभयोरपि॥किंचित्स्थायीजयीयुद्धेस्वरभूमिरियंमता॥१२२॥इतिस्वरभूः॥६९॥चैत्रादिपूर्वतःसव्यंचतुर्दिक्षुत्रयंत्रयं॥त्रिकालरुद्रभूम्येषाजयदापृष्टदक्षिणे॥१२३॥इतिकालभूः॥७०॥सप्तरेखांकितेचक्रेऋक्षराहुःसउच्यते॥धिष्ण्ययस्मिन्स्थितोराहुःऋक्षराहुःसउच्यते॥१२४॥इतिऋक्षराहुः॥७१॥द्वादशारेषुसव्येनमासान्चैत्रादिकान्यसेत्॥वह्नमासस्थितोराहुर्मासराहुरिहोच्यते॥१२५॥इतिमासराहुः॥७२॥पूर्वोक्तरांतंहस्तेनशुक्लपक्षेमरक्षिणः॥पक्षभुक्तिप्रमाणेनपक्षराहुरियंमतः॥१२६॥इतिपक्षराहुः॥७३॥त्रिंशद्दलांकितेचक्रेवह्नितःपूर्णमादिकान्॥तिथीन्विन्यस्ययावंतिदिनराहुःसउच्यते॥सप्तरेखांकितेचक्रेकोणेरेखाद्वयान्विते॥हत्वाविलोममार्गेणसंस्थाप्यंतिथिमंउलं॥१२८॥पूर्णमाद्यग्निरेखांतस्तिथिरेखाक्रमेणतु॥तिथिभोगभ्रमोराहुर्दिनराहुःसउच्यते॥१२९॥इतिदिनराहुः॥७४॥ऐंऋांहस्मतृतीयायांसप्तम्यांशूलिनोदिशि॥दशम्यांधनदाशायांवायव्यांभूतवासरे॥१३०॥शुक्लपक्षेतुवारुण्यांचतुर्थ्यांसमुदित्यसौ॥नैऋत्येचतथाष्टम्यांएकादश्यामेदिशि॥१३१॥आग्नेयांपंचदश्यांचमासेराहुरयंसदा॥खंउगत्वाऋमत्येवंखंउराहुस्ततोमतः॥१३२॥इतिखंउराहुः॥७५॥ईद्वायुयमरौद्रेतोयाग्निशशिरासप्तसु॥यामार्द्रमुदितोराहुर्भ्रमत्येवंदिगष्टके॥१३३॥इत्यर्द्धयामराहुः॥७६॥ईशानयमवातेंद्रराक्षसःसोमाग्निवारुणे॥पूर्वाह्णपिभ्रमत्येवमपराह्णप्यपक्रमः॥१३४॥दिनपंचदशांशेनमुहूर्तःपरिकीर्तितः॥एवंमौहूर्तिकराहुर्ज्ञातव्यःस्वरवेदिभिः॥१३५॥इतिमुहूर्तराहुः॥७७॥रविःसोमःकुजःसौम्यःगुरुश्शुक्रशनिस्तमः॥ऐंऋांदीशानपर्यंतमर्धयामभ्रमस्मृतः॥दिनवारक्रयाज्ञेयंतुर्यतुर्यदिशाक्रमात्॥विज्ञेयःकुलिकोराहुरुक्तानेयत्रशनेश्चरः॥१३७॥इतिकुलिकराहुः॥७८॥सन्मुखावामसंस्थावायस्थेयंराहुमंउली॥परांजेयंभवेन्नवाद्यचरणेनथा॥यस्यदक्षिणपृष्टस्थाएषाराहुपरंपरा॥ससहस्रशतनापिपरसैन्यंनिहंतनि॥१३९॥इतिकु

लकराहुः॥दिशियस्यांस्थितश्चंद्रःसव्यमार्गेणराशिगः॥राशिचंद्रःसविज्ञेयसर्वदास्वरवेदिभिः॥१४०॥इतिराशि
चंद्रः॥८०॥सप्तसप्तशलाकाख्येलक्तिकादिसमन्विते॥शुक्लपक्षेद्वितीयायांभान्युदितःशशीभवेत्॥१४१॥इत्यर्धयश
शि॥८१॥चक्रेसप्तशलाकाख्येवहन्मासर्क्षगःशशी॥मासचंद्रेभवेद्देशज्ञातव्यःस्वरवेदिभिः॥१४२॥इतिमासचंद्रः
॥८२॥पूर्वोत्तरगतःशुक्लेलक्ष्मपश्चिदक्षिणे॥पक्षभुक्तिप्रमाणेनपक्षचंद्रइहोच्यते॥इतिपक्षचंद्रः॥८३॥चक्रेसप्तश
लाकाख्येऽग्रामध्येकंभंन्यसेत्॥ततोवामेनचंद्रर्क्षंदिनचंद्रइहोच्यते॥१४४॥इतिदिनचंद्रः॥८४॥दिनभाच्चैवसव्ये
नसपादघटिकाद्वयं॥प्रतिनाडिभवद्भुक्तिरेषतात्कालिकःशशी॥१४५॥इतितात्कालिकचंद्रः॥८५॥सप्तमाबिंबस्त्र
पेणप्रत्यक्षइहदृश्यते॥वामाग्नेसंस्थितयश्चंद्रःसप्तविधोरणे॥१४६॥इतिसप्तविधचंद्रः॥दक्षिणेनगतोभानुर्ज
यदायाम्यपश्चिमे॥उत्तरायनचारस्थोविजयंशुक्लसाम्ययोः॥१४७॥सप्तरेखांकितेचक्रे
भानुभंयत्रसंस्थितं॥दिनभानुर्भवत्येवंचंद्रवच्चेष्टकालिकः॥१४८॥प्रत्यक्षंदृश्यतेयस्यां
भानुबिंबदिशिस्थितं॥दक्षपृष्टिस्थितायेतेकर्त्तव्याजयकांक्षिभिः॥१४९॥इतिसूर्यः॥७
पूर्वस्यामुदयेब्राह्मीप्रथमेनवमेतिथौ॥एकादश्यांतृतीयायांकौमारीवन्हिकोण॥१५०
॥चतुर्थेद्वादशीप्रोक्तावैष्णवीनैऋतेतथा॥वाराहीदक्षिणेभागेपंचमीचनयोदशी॥षष्टि
चतुर्दशीचात्रइंद्राणिपश्चिमस्थिता॥पूर्णिमायांचसप्तम्यांचामुंडोदयः॥१५२॥
नष्टचंद्रदिनाष्टम्यांमहालक्ष्मीशिवालये॥त्रयोदश्यगतादेवीनवम्यांभद्रकालिका॥१५३॥
भ्रमंतितनमार्गेणभवेत्कालयोगिनी॥चंद्रचंद्राग्निनैऋत्येयमतोयनिऋद्धरे॥सूर्यो
ष्णचारेषुपर्यंतेद्वारयोगिनी॥दिक्स्थानसंमुखेदृष्टिर्विदिक्स्थादारुणामता१५५॥कोणस्थानांचकोणंतिथिदि
श्युदयक्रमात्॥जयदापृष्टदक्षस्थाभंगदावामसंमुखी॥१५५॥त्रिविधंयोगिनीचक्रंइत्युक्तंचादियामले॥इतिचि

॥श्रीराम्॥
॥३६॥

185
1918

धियोगिनीचक्रं॥ ॥मध्यबात्यक्रमणेववामंप्रतिपदादिषु॥वर्त्तमानतिथेकस्यावर्जयेदाश्रमाक्षये॥१५८॥इतिति
थिकालः॥८९॥षड्विंशत्रिगुणंलक्तागताहानिचयोजयेत्॥अष्टशेषंभवेत्कालोजयदःपृष्टदक्षिणे॥१५९॥इतिषड्वि
शत्रिकालः॥शन्यर्कभौमजीवेषुमध्यकालःप्रकीर्त्तितः॥बात्यशुक्रेंदुसौम्येषुवर्जनीयःसदारणे॥१६०॥इतिवार
कालः॥९३॥पृष्टदक्षिणतोवायुर्जयदाभवतिध्रुवं॥वामायंभगदःप्रोक्तःसर्वयुद्धेषुसर्वदा॥१६१॥इतिवायुः॥९४॥
युद्धकालेयदाचंद्रःस्थायीजयतिनिश्चितं॥तदासूर्यप्रवाहस्तुपायीविजयेततदा॥१६२॥इतिशरीरभूः॥९५॥ए
तानिभूबलान्यत्रज्ञातव्यान्युदयक्रमात्॥सन्निपातविशेषेणभूरिमेलापकोबली॥१६३॥मासपक्षदिनाब्दायुः
कंभ्रमणक्रमात्॥यथादिनेतथारात्रौज्ञातव्यंस्वरवेदिभिः॥१६४॥युद्धस्यप्राग्दिनेसायंव्रतरूढःस्वरपारगः॥भास्कर
स्यमहामंत्रंजपेदयुतसंख्यया॥१६५॥दशांशहोमयेत्कुंडेत्रिकोणेद्वादशांगुले॥अर्कस्यचसमित्पुष्पैर्मध्वाज्यार्कप
यायुतैः॥१६६॥मंत्रः॥ॐह्रांह्रींसः सूर्यायनमः॥इतिमंत्रंस्वाहांतंहोमयेत्॥युद्धारंभहयारूढःस्वरज्ञोदृढमानसः
पुनरेवजपेन्मंत्रशतेकंसूर्यसन्मुखः॥शुक्लवासानरःस्नात्वाततःसूर्यविलोकयन्॥यादृक्यदृश्यतेचिन्हंशुभंवार्यदिशा
शुभं॥१६८॥खंडितंखंडितंसंयुक्तंप्रकटंनिकटंवर्त्मनी॥स्थितेचकर्बुरेपीतेपूर्णायांजयोभवेत्॥१६९॥भूबलानिस
माप्यैतच्चतुराशीतिसंख्यया॥यदाश्रयाबलस्यापिशत्रुस्यरक्षगामिनी॥१७०॥अर्द्धद्वार्धचमासेनिजदलेसहितेवा
सेरवासरार्धयामस्यार्धमुहूर्तेभ्रमतीचघटिकायद्यदाशाष्टकंपि॥संग्रामेचातुरंगेकविरणखलकेकोव्ययुद्धेभटानां
निःसंदेहंजयार्थंनरपतिगदितंभूबलंभूवराटं॥१७१॥इतिनरपतिजयचर्यास्वरोदयेभूबलाध्यायोद्वितीयः॥२॥०
पुनरन्यत्प्रवक्ष्यामिमंत्रंयत्राहिकंबलं॥यस्यप्रभावतोयुद्धेदुर्बलस्यबलंभवेत्॥१॥चतुरस्रंचतुर्द्वारंत्रिरेखंपद्मगर्भि
तं॥हस्तत्रयप्रमाणंतुतंदुर्लेमंडलंन्यसेत्॥२॥पद्मपत्रैस्तिरेखद्यैश्चतुःषष्टिप्रमाणतः॥एकैकंपद्मपत्रेषुवस्वंकसंख्यार्
लदलं॥३॥भैरवीभैरवासिद्धिग्रहनागाउपग्रहाः॥पीतंश्वेतंपीतसंयुक्तादिक्यालैश्चसमन्विता॥कर्णिकायांन्यसेद्देवं

शीवंसांगंसशस्त्रकं॥प्रणवादिनमोंतैश्चनाममंत्रैस्तनार्चयेत्॥५॥मंडलाग्रलिखेत्पद्मंवीरंतत्रनिवेशयेत्॥तीर्थो
दकान्वितैःकुंभैःसदूर्वाक्षतपल्लवैः॥६॥मृत्संजयेनमंत्रेणशतवाराभिमंत्रितैः॥अभिषिंचेत्ततोवीरंशुभलग्नेस्तरो
दये॥मंत्रस्तु॥ॐजूंसः॥इतिमृत्संजयः॥अभिषिक्तस्ततोवीरःसंग्रामंविजयीभवेत्॥शस्त्रैर्नभिद्यतेतस्यशरीरं
शत्रुनोदितैः॥८॥एतन्मंडलमध्यस्थोअभिषिक्तोयदानृपः॥ततःप्रभृतियुद्धेषुशत्रुञ्जयतिसर्वदा॥९॥इत्यभिषेक
विधिः॥अभिषेकांतरंपूजाकर्तव्यापूर्वमंडले॥मृत्संजयेनमंत्रेणपूर्वोक्तविधिनाततः॥१०॥पश्चात्समर्पयन्मंत्ररण
हिसिभवेदियं॥तयासमन्वितोवीरस्त्रिदशैरपिदुर्जयः॥११॥इतिरणदीक्षा॥२॥पूर्वोक्तमंडलस्थोतेयोधशस्त्राणि
विन्यसेत्॥पूजयेद्विधिवत्तानितताजागरणक्रिया॥१२॥मंत्रः॥ॐखांखींखुंखेंखोंखः॥रौद्रमूर्त्तेखड्गायनमः॥इ
तिखड्गमंत्रः॥ॐग्रांग्रींग्रूंग्रेंग्रोंग्रः॥भैरवस्वरूपायरक्षायुधायफलकायनमः॥ॐलांक्लींलूंलेंलोंलः॥इंद्रायुधधनुषा
यनमः॥इतिधनुषमंत्रः॥ॐस्त्रांस्त्रींस्त्रुंस्त्रेंस्त्रोंस्त्रः॥ब्रह्मादिपंचदेवतामूर्त्तयेपंचबाणायनमः॥इतिबाणमंत्रः
॥ॐक्रांक्रींक्रूंक्रेंक्रोंक्रः॥शूलिनिमूर्तयेभैरवायकुंतायनमः॥कुंतमंत्रः॥ॐयोगीश्वरीशामलेमहाचामु
डेछ्रांछ्रींछ्रूंछ्रेंछ्रोंछ्रः॥भगवतेमूर्तयेछूरीकेनमः॥इतिछूरिकामंत्रः॥इतिरणपूजा॥छागोमातुलक्षाग्नेयात
ग्रामक्षतदारके॥मृत्संजयेनमंत्रेणदानबंधंग्रथितसप्तकं॥एवंकृतविधानेनजायतेरणकंकणं॥१३॥कर्पूरंकुंकुमंचै
वगोरोचनसमन्वितं॥कोकिलाख्यस्यलेखिन्यांश्वेतवस्त्रेणशोभने॥उकारद्वयमध्यस्थंसाध्यनामेरालिखेत्
॥सगर्भस्थंहकारस्थंठकारपरिवेष्टितं॥पृथ्वीसंपुटमध्यस्थंवज्राष्टकयुतंततः॥प्रणवाद्यरिनामंचहुंफट्संति
दिगष्टकं॥मैत्रेमनेशतंजप्त्वाफट्तंमूर्ध्निबंधयेत्॥१७॥श्रीसंनयतिधीरत्वंसमरेचजयप्रदः॥इतिवीरपट्ट
विधिः॥पूर्वोक्तविधाननरणपट्टमंतालिखेत्॥१८॥कृत्वाहनुमतोरूपंतद्रिमंत्रमुलिखेत्॥ॐह्रींह
नुमतेनमः॥ॐह्रांहनुमतेनमः॥एवंवा॥इतिरणपट्टविधिः॥त्रिशूलंदक्षिणेहस्तेकपालंवामकेकरे॥

॥श्रीराम्॥
॥३७॥

१९॥भीषणंभैरवंरूपंपूर्वद्रव्यैःसमालिखेत्॥त्रिपुरामंत्रनामाभ्यांग्रथितेनतुवेष्टयेत्॥२०॥मूर्ध्निबंधेनतेनैवंत्रैलो
क्यंजयतिध्रुवं॥ऐंक्लींसौंत्रिपुरामंत्रः॥इतिजयपट्टः॥कंन्याकर्त्तितसूत्रेणग्रथ्यंष्टशतं॥२१॥कृत्वैवंमेखलाजाता
कटिबद्धारिनाशिनि॥इतिमेखलाबंधः॥ब्रह्मणःकवचंकृत्वायोद्धायःप्रविशेद्रणे॥प्रभवंतिनतस्यांगेप्रहाराःशत्रु
नोदिताः॥२३॥इतिकवचं॥अनुलोमविलोमेनमंत्रंमृत्संजयेन्यसेत्॥ररक्तंचषडंगेषुन्यासोयंशस्त्रवारणे॥२४॥
इतिन्यासः॥रसनाघंटिकाग्रभागंगुल्यानामिकातले॥एतन्मुद्राप्रभावेनसंग्रामेविजयीभवेत्॥२५॥इतिमुद्रा॥
पूर्वोक्तैरवद्रव्यैरूर्जपत्रेसुशोभने॥लिखेन्मृत्संजयंमंत्रंतन्मध्येवीरनामकं॥मृत्संजयेनमंत्रेणग्रथितंतच्चनाम
कं॥रसाहस्तेकरेबध्वासंग्रामेविजयीभवेत्॥२७॥इतिरक्षा॥अरण्यशाल्मलीमूलंपुष्यार्केणतुगृह्यते॥कन्या
कर्त्तितसूत्रेणशतग्रंथनतुत्रिरं॥ग्रंथयेन्मंत्रजाप्येनप्रत्येकंचपृथक्पृथक्॥अष्टोत्तरशतेनैवजायतेवीरकुंडलं॥
॥२९॥ॐकुमारिभवतरभवतरहरबाणायवासिनित्रिपुरुषसत्येनसर्वायुधा॥निर्भंजयस्वाहा॥इतिमंत्रः॥भं
सकरूंछनेतनेवंदुर्जयस्त्रिदशैरपि॥स्तंभयेत्सर्वशस्त्राणिसर्वशक्तिसमन्वितः॥इतिवीरकुंडनं॥ईश्वरीब्रह्मदंडी
चकुमारीवैष्णवीतथा॥वाराहीवज्रिणीदंडीतथारुद्रजटाभिधा॥३३॥लांगलीसहदेवीचपाशमुंजीपुननैवा॥मु
द्गरीभूतकेशीचसामराजीहनुमता॥३२॥श्वेतापराजितागुंजाश्वेताचगिरिकर्णिका॥क्षुद्रिणीशंखिनीचैवविं
दुगीशरपुंखिका॥३३॥खर्जुरीकेतकीलाडीपूगिचनारिकेलिका॥अंजनंकांचनारस्यपंचकोन्मत्तकःकुडः॥
अपामार्गार्कभृंगोचब्रह्मवृक्षोवटस्तथा॥शतमूलीबलायुग्मंगोजिव्होपलसारिका॥३४॥अष्टलोहावसावर्ज्जी
हरिद्रालालुकंसखा॥एतावोषधयोदिव्याजयार्थंसंग्रहेद्बुधः॥३५॥सूर्यंदुग्रहणग्रासेदिशोत्सवदिनत्रयं॥पुष्य
मूलार्कयोगेवामहानवमिवासरे॥३६॥खादिरेणतुकीलेनप्रोद्धरेत्महौषधीं॥बलिपूजाविधानेनसर्वकर्मसुसि
द्धिदाः॥३७॥मंत्रः॥येनत्वांखनतेब्रह्मायेनत्वांखनतेहरिः॥तेनत्वामहंखनिष्यामिनिष्टनिष्टमहौषधी॥३८॥भु

183
1918

जहस्तसूत्रशिरः प्रभृतिषुस्थिताः॥त्रिरश्वोरप्ययोध्यासेयुद्धेचैवचतुर्विधे॥३९॥इत्योषधयः॥चंडीचक्रीचवज्रि
णित्रिशूलीमुद्गरीतथा॥देहरक्षासमरेयुद्धसर्वयुद्धनिवारिणी॥४०॥एतौहीतंशुभनक्षत्रेअपामार्गस्यमूलकं॥लेपमं
त्रेणवीराणांसर्वशस्त्रनिवारणः॥४१॥अजनंकांचनारस्यचंपकान्मत्तकंतुहि॥लेपनविजयीयुद्धेवज्रदेहोभवेन्नरः
॥त्रिलोहवृष्टिंतद्धत्वानसंवक्राभसंयुतं॥वज्रस्तंभकरस्तंभनसर्वायुधनिवारणं॥४२॥गिरिकर्णिशफागुंजाश्वेतवर्णी
समानयेत्॥चंद्रेणसंयुताःसर्वास्तिलकेनजयीरणे॥४४॥अथोपुष्पीशिरवाचैवश्वेताचगिरिकर्णिका॥गोरोचनस
मायुक्तंतिलकंशत्रुमोहनं॥४५॥कनकार्कवृष्टवंचैववह्निषट्बिंदुपंचमः॥तथाकरातितिलकंपश्येन्नंपंचधारिपुः॥
४६॥हस्तपस्पर्शकपालंतुचिताम्रतिकयान्वितं॥सितगुंजावपत्रंतत्रतस्यामूलंसमाहरेत्॥४७॥तत्कृतंतिलकंदृष्ट्वा
पश्येत्तंस्वहृतंरिपुः॥अश्वारूढोवेपमानःसपतेन्नततोभुवि॥छायायत्रजलेयातिसग्राह्यःकासमर्दकः॥अनेन
तिलकेनापिरूपवापीभविष्यति॥४९॥इतितिलकं॥ब्रह्मदंडीकुमारीचईश्वरीवैष्णवीतथा॥वाराहीवज्रिणीचैव
महालक्ष्मीचचंडिका॥५०॥एताओषधयोदेव्योनवैतामातरः स्मृताः॥हस्तान्तेहारकंबध्वासर्वशस्त्रनिवारिणी॥
५१॥वंशांगेसकशुक्लाभाहिमतारसमन्वितैः॥वज्रायस्यादिभिर्युक्तैःक्रियंतेपारदारसः॥७२॥वज्राणांद्रावणरस
स्यारदस्यचबंधनं॥लघुद्रावंतथालोहसंयोगादुपरस्परं॥५३॥अस्थिशृंखलमध्यस्थंहत्वावज्रंनिरंधृकं॥जलमां
डेनिक्षिप्यस्वस्थाद्दनसप्तकं॥५४॥वंशिरारससंघृष्टमष्टपिष्टमुपादरं॥रुयकाकंदमध्यस्थंबंधनार्थंततःपुरेत्॥
रतिनंलोहचूर्णतुटंकेननुभेदयेत्॥लघुद्राविभवेद्देवंनाममात्रेणसंशयः॥५६॥सर्वास्तामेकतःहत्वामूकान्मध्य
स्थितान्नेहत॥घुटिकाजायतेसम्यक्ताम्रवज्रागसुंदरी॥मुखस्थासिद्धिदाप्रोक्तारोजमृत्युविनाशिनी॥संग्रामे
विजयीवीरोवज्रदेहोबलोत्करः॥५८॥सर्वलोकप्रियानित्यंनारीणांसुभगस्तथा॥घुटिकेयंमयाप्रोक्तायथोक्ता
ब्रह्मयामले॥५९॥इतिघुटिका॥सिंहीव्याघ्रीमृगीहंसीचतुर्थीयंकपर्दिका॥एतेषांलक्षणंवक्ष्येप्रभावंचयथाविधि॥

॥श्रीराम्॥
॥३८॥

189
1918

॥६०॥सिंहीसुवर्णवर्णाचव्याघ्रीमूल्यासेरषका॥मृगीतत्रविजानियापीतपृष्ठासितोदरं॥६१॥सिंहीजलचराश्वेताविं
दंतानातिदीर्घिका॥एवंविशेषाद्विज्ञायतनःकर्मसमाश्रयेत्॥६२॥ओषधीसिंहिकीनामतयाघृष्टोमहारसः॥सिंहीक
पर्दिकामध्येक्षिप्यस्तमूलसंयुता॥६३॥विधायवदनंतस्यासीलकेनसमन्वितः॥अस्यावक्रस्थितायातुसिंहवज्जायते
नरः॥६४॥मदोन्मत्तगजस्तस्यदर्शनेनपराङ्मुखः॥रणेराजकुलेजातोद्यूतेविवादेवापाराजिते॥६५॥व्याघ्रीरसेनसं
घृष्टपारदामूलसंयुतः॥पूर्ववत्सारयेद्व्याघ्रीफलंचैवतथाविधं॥६६॥मृगमूत्रेणसंभिन्नामृत्तिकारतिमानवः॥बाल
प्रहरणेनरः॥हंसपादीरसंघृष्टपारदामृदुसंयुतः॥६७॥सिंहीमध्यक्षिपेद्धीमान्मुखस्थेसर्वसिद्धिदा॥ग्रहाःपीडांन
कुर्वंतिसर्वविघ्ननिवारयेत्॥६८॥रुद्धावरंजंगमंचैवविशंनश्यतितत्क्षणात्॥६९॥इतिकपर्दिका॥कृत्तिकाचविशाखा
चश्यामबारणसंयुता॥नाडिनेघटितंशस्त्रंसंग्रामेजयदायकं॥७०॥इतियोगघटितशस्त्राणि॥अपामार्गरसेनैवंयानि
शस्त्राणिवधयेत्॥जायंतेतानिसंग्रामेवज्रसाराणिनिश्चितं॥इतिशस्त्ररक्षा॥विद्युत्यातमृतारूढीनिषेषयत्करकांबु
ना॥अनेनलेपयेच्छस्त्रंसन्नाहफलकंपिवा॥७२॥तत्रलग्नानिशस्त्राणितरंतिचनमंतिच॥नभिंदंतिशरीराणिपुष्पा
णिचमृदूनिच॥७३॥इतिशस्त्रमोटणं॥हस्तसर्पशिराश्रोष्टीविषंपंचपल्लानिच॥छुछुंदरीवसाष्टीचतथाचगृहगो
धिकाः॥७४॥हस्त्यश्वदृश्चिकाश्वाष्टीकपिकच्छुफलाष्टकं॥द्वीपलोहरितालश्चहलकलासवसाफलं॥७५॥लोग
लीकरविराज्यांत्रीणित्रीणिप्रकीर्तिता॥एतेषांशोधितंकृत्वंभल्लातकरसंयुतं॥७६॥सर्वेषांचैवशस्त्राणांलेपोनास
मुदाहृतः॥विद्धास्तेनमनुष्यास्त्यजंतिजीवितंध्रुवं॥७७॥रक्तंकंचुकियानारीरक्तावरणांनिता॥नरदारुसमायु
क्तापर्वतानपिपातयेत्॥७८॥गृहीतानसिकानीलाषडबिंदुकीटकान्विता॥शस्त्रलेपेनघातात्तुजयंतेकीटवन्नृण
॥७९॥इतिशस्त्रलेपः॥षष्ठिंशत्यांचतुःषष्ट्याशतेनाष्टांतरेणच॥मयूरलूकपक्षाणांतन्मात्रंग्रंथिपुच्छकाः॥८०॥गृ
हेणमुक्तिपर्यंतंरक्तसूत्रेणबंधयेत्॥इष्टमंत्राभिजप्तंतंसिद्धिरिष्यरिनाशनं॥८१॥विसर्गमुद्रयातंनगछगछपरंभ्र

वं॥सर्वोच्चस्थानगोवीरस्वसैन्यविजयावहा॥८३॥इतिपक्षबंधनं॥चांगलीब्रह्मदंडाच्चक्लेमान्मत्तरसान्विता॥मार्जयेत्ताम्रवर्णेपश्चाद्यंत्रंसमालिखेत्॥८३॥काकरक्तंतथाविष्टाचितांगारहलाहलं॥काकपिछस्यलेखिन्यालिखेन्मंत्रं चमार्गतः॥८४॥मध्यबीजस्यमध्यस्थशत्रुनामसमन्वितं॥मध्येतुवायुबीजेनवेष्टयेत्त्रिगुणंपुनः॥८५॥वायुमंडलगं कृत्वावायुबीजेनराजितां॥द्वादशस्वरसंयुक्तांवेष्टयेत्सव्यमार्गतः॥८६॥ताम्रकस्यास्यनादेनव्याकुलीभूतमानसा ॥बलयुक्तामहावीरापत्कार्येतरणांगणात्॥८७॥इतिताम्रकविधिः॥त्रपुहेमायसंरौप्यंसमभागेनतत्पलं॥द्वादशा ग्नेनताम्रेणकारयेज्जयकाहलीं॥८८॥काहलीसरसंलिप्यवाद्येनारणांगणे॥मृत्वानादंप्रणश्यंतिबलिष्टाश्चापि शत्रवः॥८९॥इतिकाहली॥ताम्रकस्यविधानंतुटंक्कायामपिकारयेत्॥तथैवफलमप्युक्तंसमरंगणभूमिषु॥९०॥ इतिटंक्का॥तुंबिनीचित्रिणीदंडीहलेोन्मत्तरसान्विता॥मार्जयेन्मुरजेचर्मसप्तवारान्मुदन्वितं॥९१॥दंडीसंचित्रकी दंतिलज्जालुरससंयुता॥क्रूरंविमर्दयेत्तेनजायतेवाद्यभोजनं॥९२॥ब्राह्मीजातीकुमारीचविद्युद्भस्मोदकान्विता ॥इष्टमंत्राभिजप्तंतुजयार्थंवाद्यभोजनं॥इतिमुरजभोजनविधिः॥अग्निहोत्रश्मशानांत्यजातीगेहसमुद्भवं॥ भस्मत्रितयमादायकर्त्तव्यंतस्यमर्दनं॥९४॥इंद्रवृक्षमयंकार्यमुलेालूखलादिकं॥चतुरस्रंचपद्मेचद्वारहीनंचमंड लं॥९५॥रुद्राक्षितेालूखलस्तंभंकुर्युस्तद्भस्मकुट्टनं॥चतुर्वर्णोद्भवाः कन्याश्चतुःषष्टिप्रमाणतः॥चतुर्विंशतिसंख्याना रासर्गान्वितसंयुतं॥नरामंसंभवस्थानमिसर्वमंत्रमयंशुभं॥९७॥कालउकुकुरंतुउचुंतउल्कंन्युंबमणिभूछिकरंतुकिंजा एटिंकिंपिछइहिइमंभसउल्कयउइति॥एतद्भस्मलतांरेखांलंघयतिनवैरिणः॥क्षिप्यतेवाथवासैन्यंभंगमायातितत्क्ष णात्॥९८॥इतिभस्मकुट्टनं॥मारणंमोहनंस्तंभंविद्वेषोच्चाटनंतथा॥एवंयन्मार्गलंयत्रंभेदनंबहुधास्थितं॥९९॥द्वादशा रंलिखेच्चक्रंवृत्तत्रयविभूषितंउष्ट्रीमंत्रंतुनद्वात्र्यंयमलांकंचमध्यतः॥ॐउंह्रीउष्ट्रीविहनदंष्ट्राननेहुंफट्॥इदंउष्ट्रीमं त्रंदशसहस्राणिजपेत्॥घृतमधुरस्तुपुष्पैःसहस्रमंकेहामयेत्सिद्धोभवति॥यमराजसदामययमदारुणोदयः॥यम

॥श्रीराम॥
॥३९॥

191
1918

यानिरयारव्ययपक्षेयोनिरामयः॥इदंयमलोकंद्वात्रिंशदक्षराणिजपेत्॥तथापूर्वविधिवासप्तशतानिहोमयेत्॥सि द्धोभवति॥मनीषितकर्माणिकरोति॥चिंतांगारविषंरक्तंहस्मान्मत्तरसस्तथा॥एतैर्नरास्थिलेखिन्यांयंत्रमेतत्पटेल् लिखेत्॥२॥साध्यनामचतन्मध्येहुंषःरंजिकयावृतं॥यमरूपमिदंसाक्षान्महिषाननगंकुरु॥३॥हस्माष्टम्यांचतुर्दश्यांगंतव्यंपितृमंदिरं॥नग्नमुक्तशिखोभूत्वामध्यमांसस्तताचर्चयेत्॥४॥लिप्तोछिष्टशरावेषुहस्मसूत्रेणवेष्टयेत्॥ श्मशानभूमिमध्यस्थंसप्ताहान्मारयेद्रिपून्॥५॥इतिमारणं॥रोचनांकुंकुमंचद्वहस्मान्मत्तरसान्वितं॥रोहितोद्भवलेखिन्याभूर्जेयंत्रमिदंलिखेत्॥६॥साध्यनामचतद्गर्भेबात्येचैकाररंजिका॥वन्हिमंडलगंकृत्वारक्तसूत्रेणवेष्टयेत् ॥७॥सिक्तंकेनावृतंकृत्वास्करांकुंभेविनिक्षिपेत्॥पूजयेद्रक्तपुष्पैस्तुसप्ताहान्मोहयेद्रिपुं॥८॥इतिमोहनं॥शिला तालहरिद्राश्वमषसूत्रसमन्विता॥काकिल्याख्यस्यलेखिन्यालिखीरक्तपटेलिखेत्॥९॥मध्यनामयुतंमध्यरं जितालेनिवेशयेत्॥१०॥पूजयेत्पीतपुष्पैस्तुकुंकुमेनचवापुनः॥स्तंभनंदेहमनसोः सप्ताहाज्जायतेरिपोः॥११ निंबासक्षित्रकैरक्तैर्ल्येमहिषाद्रुधिरान्वितैः॥श्वेतवस्त्रेचलेखिन्यालिखेद्यंत्रमिदंवरं॥१२॥साध्यसाधकयो र्नामपरस्परपराङ्मुखं॥व्यतिक्रमात्सरंवापियंत्रमध्येनिवेशयेत्॥१३॥रंजिकास्फुटसमायुक्तंमहिषात्श्वां तरद्रुतं॥निंबवृक्षतलेन्यस्तंसप्ताहाद्वेषकारकं॥१४॥इतिविद्वेषं॥काकविड्वरक्तनाशिखिध्वजपटेशुभं ॥काकपक्षस्यलेखिन्यालिखेद्यंत्रंसरोदये॥१५॥साध्यनामलिखेत्तत्रचतुःकोणेषुमध्यगं॥सविसर्गयकोर णत्रिरुच्चारणरंजितं॥१६॥उष्ट्रास्रुंहतंयंत्रंबद्धंकाकगलेततः॥सयंत्रंवायसयुद्धेततस्तूच्चाटनंभवेत्॥१७ इत्युच्चाटनं॥कालयेरोचनाचैलज्जालुगजवारिभिः॥मदनाद्भवलेखिन्यायंत्रंभूर्जेलिखेदिदं॥१८॥साध्य नामचतन्मध्येक्लींकाररंजितान्वितैः॥नरास्थितिहतंयंत्रंसिद्धिकृन्नतुवष्टिनं॥१९॥त्रिमधुरस्रुक्षापितंतच्चरक्तपु ष्पैस्तुपूजितं॥सप्तरात्रेणतद्यंत्रंवशीकरणमुत्तमं॥२०॥इतिवशीकरणं॥एवंसर्वेषुकार्येषुविधियुक्तंतुकारये

त्॥ततस्तसिध्यतेयंत्रंसत्यंसत्यंनसंशयः॥३७॥हनुमंतंकालरात्रिंमहामारिखगाधिपं॥भैरवंसेत्रपालंचफणी
द्रगणनायकं॥३८॥पताकायांलिखेदतद्दष्टकंपूर्वसूचितं॥ततःसारतरंज्ञात्वाप्रथमंविस्तराद्वदेत्॥३९॥भारण्य
पट्टहीमूलंगृहीतंचशुभेदिने॥कन्याकर्तितसूत्रेणदिनेवस्त्रविनिर्मितं॥२४॥सार्द्धहस्तत्रयंश्वेतंशंखतंत्रप्रदाप
येत्॥हरिद्राहरितालेनशिलयासंयुतंनच॥पंचाष्टागुलमानंहिध्वजोहनुमतलिखेत्॥दीर्घदंतंकरालास्यंदी
र्घबाहुनखायुधं॥२६॥वामहस्तध्वजंकुर्यादक्षिणेमेरुपर्वतं॥तद्वक्रमंमहारौद्रंजिह्वालांगूलवेष्टितं॥२७
रक्तवस्त्रसकोपीनंशिरसंमुकुटोज्ज्वलं॥इत्यध्यानंविन्यसेत्तस्यनिजनाथस्यनामकं॥हनुमंतंलिखेत्तत्रमूलमंत्रंद
लाष्टकं॥२९॥मालामंत्रेणतद्वाह्यंसव्यमार्गेणवेष्टयेत्॥३०॥ॐह्रांह्रींह्रूंह्रैंह्रौंह्रः॥हनुइतिमूलमंत्रः॥
ॐवज्रकायवज्रतुंडकपिलपिंगलोर्ध्वकेशमहाबलरक्तमुखतडिज्जिह्वरौद्रदंष्ट्राकटकरालाक्षीनेमहारुद्र
प्रहारलंकेश्वरमहासेतुबंधशैलप्रवाहगगनेचरएत्यहिभगवन्महाबलपराक्रममैरवोज्ञापयतिएहिएहि
महारौद्रदीर्घलांगूलेनभ्रामुकंवेष्टयवेष्टयभंजयभंजयखः ऐंह्रींफट्॥इतिमालामंत्रः॥गायत्रीरूपयेद्रेफैःश्रुतुः
षष्टिप्रमाणकैः॥रक्तवर्णन्यसेच्चापिरसनाग्रेत्रिसंख्यया॥३१॥स्तंभिनीमोहिनीचैवराधिनीभंजनीतथा
गात्रेषुविन्यसेद्देवीप्रणवादीनमोंतगाः॥३२॥लकारंपर्वतंद्यात्ध्वजदंडंचकारकं॥ऊंकारंमुकुटमध्यस्थंकु
कारंचतदग्रतः॥३३॥वदनेगुह्यकेमूर्ध्नामूलमंत्रंन्यसेद्बुधः॥लांगूलेमातृकांचापिस्मृतिकांप्रणवादिकं॥
३४॥मस्तकोपरिकर्त्तव्यामातरोग्रहसंयुताः॥अष्टम्यांचचतुर्दश्यांप्रतिष्ठाकारयेत्ततः॥३५॥स्फुर्वैचैवन
क्षत्रेतारांचंद्रबलान्विते॥रक्तांबरधरोमंत्रीरक्तगंधानुलेपनः॥३६॥रक्तपुष्पहतागोपोवस्त्रसन्नद्धविग्र
हः॥उद्धरदक्षतेःपद्मजष्टपत्रंसुशोभनं॥स्तंभिनीमोहिनीचैवराधिनीभंजिनीतथा॥पूर्वादितश्चतुर्दिक्षु
क्रमाद्देवीनिवेशयेत्॥३८॥उद्दीयानादिकान्बीजान्रुद्धापयेदीशकोणतः॥भैरवीभैरवासीद्विग्रहानागादि

॥श्रीराम्॥
॥४०॥

193
1918

शाधिपाः॥३९॥प्रत्येकंक्रमयोगेनन्यसेत्पत्राष्टकेबुधः॥पूजयेच्चक्रमेणैवकर्त्तव्यावरमंडले॥पुष्पप्रकारशोभा
ढ्यकर्पूरागरुवासिते॥चंद्रोदयलताटोपध्वजाष्टकविभूषिते॥४१॥मंडलस्यसामर्थ्येतुकुर्यादूर्ध्वंततःपरं॥स्ता
पयेत्तंचगव्येनदर्पणोदयमस्तगं॥अग्निमारुतबीजेनविदध्यादासनंततः॥मूलमंत्रंन्यसेन्मूर्तेर्हनुद्देवस्यमातृ
काः॥४३॥अंगेषुविन्यसेत्तत्रषट्स्वरादीर्घसंज्ञकाः॥यकारादिनकारांतान्स्तंभिन्यादिषुविन्यसेत्॥४४॥
पंचोपचारमिश्रैश्चमद्यमांसासवैस्तथा॥पूजयेन्मंडलेद्वानूप्रणवादिनमोंतगैः॥४५॥पूजांकृत्वाविधानेन
ध्यानंकृत्वाततोनरः॥पूजाध्यानप्रयोगेनसिद्धाभवतिसर्वदा॥४६॥विचित्रवस्त्रसंयुक्तंसर्वाभरणभूषितं
रक्तवस्त्रंतथाग्निंसर्वलोकभयंकरं॥४७॥इतिध्यानं॥लक्षमेकंजपेत्तस्यमूलमंत्रंषडक्षरं॥मध्याज्यैरक्तपु
ष्पैश्चहोमंकुर्याद्दशांशतः॥४८॥कुमारीभोजयेत्तत्रचतुषष्टिप्रमाणतः॥आचार्यंदक्षिणादेयानगरग्रामसत्र
कंकाष्टपाषाणधातूनांपूजार्थंनिर्मितोपिवा॥प्रतिष्ठात्रितयंयत्रदेशग्रामेपूरेपिवा॥नदुर्भिक्षंभवेत्तत्रनचमा
रीभयंभवेत्॥परचक्रागमनेनव्याधिभिश्चनपीड्यते॥५१॥नपतत्यशनिस्तत्रनचरोगभयंभवेत्॥शाकिनी
भूतवेताळविषपीडानजायते॥हनुमतःपताकेयंगजाश्वोपरिसंस्थिता॥धारितासाप्रयत्नेनरिपुसैन्यस्य
संमुखी॥५३॥तस्यदर्शणमात्रेणव्याकुलिभूतमानसाः॥नश्यंतिरिपवस्तस्यसिंहस्येवगजायथा॥५४
॥इतिहनुमत्पताका॥अथरक्षांप्रवक्ष्यामिसर्वसिद्धिप्रदायकं॥स्तंभिनीशत्रुसैन्यस्यभूतादीवशंकरी
॥५५॥रोचनांकुंकुमाभ्यांचभूर्जपत्रेसुशोभने॥सुवर्णमयलेखन्यायत्रमष्टदलंलिखेत्॥सिद्धनामचतन्मा
ध्येमूलमंत्रंदलाष्टके॥मालामंत्रश्चतद्बाह्येत्रिधाहिंकारवेष्टितं॥५०॥त्रिलोहवेष्टितंकृत्वाकटिबाहुशिर
स्थितं॥धारयेद्यइमांरक्षांविघ्नंतस्यनजायते॥५८॥रणेराजकुलेद्यूतेव्यवहारेपराजितः॥शस्त्रंनाक्रमते
तत्रस्त्रीणांचातिवल्लभः॥५९॥ज्वराःसर्वेप्रणश्यंतीद्याह्निकाद्याविशेषतः॥इयंहनुमतोरक्षासर्वोपद्रव

नाशिनी॥ ६०॥ तस्यपीडानकुर्वेनिग्रहाश्चेवउपग्रहाः॥ गजवन्हिभयंनास्ति व्याघ्रतस्करजंभयं॥ ६१॥ इति
रक्षा॥ इछाकारंपटंज्ञात्वापताकायाश्चर्चिपुनः॥ चंद्रार्कग्रहणप्राप्तेहनुमंतंलिखेत्ततः॥ ६२॥ मातृकायाज
पेत्तत्रयावन्मुक्तिप्रजायते॥ होमयेच्चरुशोणतिलसर्षपकादिभिः॥ ६३॥ युद्धकालेचतत्पीछंगजाश्वोपरि
संस्थितं॥ दर्शितंशत्रुसैन्यस्यभंगोभवतिनिश्चितं॥ ६४॥ इतिपिछं॥ मरुनेनहनुंलत्वापूर्वलक्षणलक्षितं॥ च
र्चितंचैवलांगूलंकारयेत्साधकोत्तमः॥ ६५॥ परचक्रस्ययेमुख्यालांगूलस्यानकारिणः॥ गजाश्वरथसैन्या
निबहिस्थानिनुकारयेत्॥ ६६॥ पूर्वमंत्रास्परैर्भिद्यलांगूलनतुवेष्टयेत्॥ वेष्टयेत्प्रतिमांसर्वांमापारत्तलमस्तकं
॥ ६७॥ स्थापयेत्पूर्वविधिनापरचक्रस्यसंमुखं॥ दर्शनात्परचक्रस्यभंगमायातितत्क्षणात्॥ ६८॥ अथवा
होमयेत्तत्रलांगलीलवणंविषराजिकातुषकाशास्थिधूषणंनिंबमेवच॥ ६९॥ षट्कोणकुंडमध्येतुनिंबास्त
चित्रकोद्भवः॥ समिधोज्वालयेत्तत्रनैर्ऋत्याभिमुखस्थितः॥ ७०॥ होमयेद्धनुमंत्रेणसहस्रैकंदिनेदिने॥
दिनसप्तकमध्येतुशत्रुपीडानतोभवेत्॥ ७१॥ अंगराहोमहापीडाविस्फोटांगेऽचूलिका॥ म्रियतेनात्र
संदेहःसंग्रामंकुरुतेयदि॥ ७२॥ इतिहोमः॥ मालामंत्रंपठेद्यस्तुहनुमंतंरणांगणे॥ तस्यांगंवज्रवद्याति
हनुतुल्यपराक्रमः॥ ७३॥ पुनरन्यत्प्रवक्ष्यामियंत्रंपरमदुर्लभं॥ मांडुकीनामविख्यातंसर्वशास्त्रेषुगोपितं
॥ ७४॥ अनयार्न्निव्रणंशुद्धंभूर्जपत्रंसुशोभनं॥ तस्मिंस्तुखररक्तेनवामकर्णेद्भवेन्नु॥ ७५॥ चितांगार
विषैर्युक्तंलक्षोन्मत्तरसेनतु॥ कुलिकेविलिखेद्यंत्रंनैर्ऋत्याभिमुखस्थितः॥ ७६॥ प्रेतवच्चिंतयेत्साध्यंमुक्त
केशंविवस्त्रकं॥ नग्नामेरखरायांभिद्यालोपाविष्टस्तुसाधकः॥ ७७॥ पिउयित्वातुतद्यंत्रंशालूरस्यमुखं
क्षिपेत्॥ कीलयेत्पुष्टलोहनलिप्तकांउमयेनच॥ ७८॥ आनियदारानिलंचसप्तगेहोद्भवंततः॥ तन्मध्येदूरं
क्षित्वातद्गांउमुद्रयेत्ततः॥ ७९॥ तापयेद्युद्धकालेचचितांगारानलोपरि॥ गात्रभंगोमनस्तंभोवायुपीडानं

॥ श्रीरामः॥
॥ ४१॥

195
1918

थोदरे॥ ८०॥ म्रीयतेरिपुसंदेहोयदिशक्रसमोरणे॥ ८१॥ इतिमंडूकयंत्रं॥ शिलातालहरिद्राभिरर्कपत्रयुगेलिखेत्
॥ कोकिलाख्यस्यलेखिन्यास्तंभनंरिपुनामकं॥ ८२॥ त्रिउकारैःसमावेष्ट्यतद्बाह्येपार्थिवंपुरं॥ वज्राष्टकसमोपेतंरेफ
शोउर्धवेष्टितं॥ ८३॥ मायाबीजेनसंवेष्ट्यत्रिधातुशनिरोहितं॥ तद्युगंयोजयित्वातुकंटकैःकीलयेत्तदा॥ ८४॥ सिपेद्व
ल्मीकमध्येतुपाषाणैःसंप्रपूजयेत्॥ पश्चात्समारभेद्युद्धंविवादेचार्थसाधकः॥ ८५॥ गात्रभंगोभवेद्वंमनस्तंभस्तथैव
च॥ जिव्हास्तंभोविवादेचमध्येसोजायतेध्रुवं॥ ८६॥ इतिस्तंभनमंत्रं॥ अर्कपत्रयुगेनामचितांगारेणलेखयेत्॥ पूर्ववत्
कीलयेत्पश्चाच्छिलायांसाधयेध्रुवं॥ एतद्यंत्रप्रभावेनमनोभंगंभवेत्तरेपोः॥ प्रविशेच्चैवसंग्रामंम्रियतेनात्रसंशयः॥ ८८
॥ इतिस्तंभनयंत्रं॥ रेफयुक्तंहकारंचअष्टस्वरविभूषितं॥ नादबिंदुसमायुक्तंउकारसंपुटस्थितं॥ ८९॥ दिक्षुवज्राष्ट सं
ज्ञिन्नंयोउशस्वरवेष्टितं॥ वज्रांगेषुसमायुक्तंआदियंत्रंयथास्थितं॥ ९०॥ आदिबीजाद्धरेर्नामदत्वात्तस्यपरिस्फुटं॥ उ
त्तराभिमुखोमंत्रीशुभध्यानपरायणः॥ ९१॥ कांस्यभाजनमध्येतुचंदनेनसुगंधिना॥ लिखेद्भूर्जस्यलेखिन्याहस्तत्र
यप्रमाणया॥ ९२॥ सुगंधैःकुसुमैःश्वेतैरष्टोत्तरशतैस्तथा॥ अर्चयेद्विधिवद्यंत्रंफलंयावद्दिनेदिने॥ ९३॥ लिखितंपू
जितंचैवक्षालितंचजलेनयत्॥ तज्जलंपीतमात्रंतुपरविद्याविनाशनं॥ ९४॥ शाकिनीभूतवेतालपिशाचोरगराक्षसाः
॥ भवंतिनिःप्रभाःसर्वेयंत्रस्यास्यप्रभावतः॥ ९५॥ मूलविषूचिकाजीर्णलूताविस्फोटकादयः॥ अभिचारकृतादोषा
विषंस्थावरजंगमं॥ ९६॥ गर्भानुवेदनायस्यामूढगर्भस्तथाभवेत्॥ एवंदोषैस्तुरोगार्त्ताःस्वस्थास्युःसर्वजंतवः॥ ९७
॥ ज्वराश्चप्रशमंयांतिमारुतश्लेष्मपित्तजाः॥ जीर्णज्वराश्चविषमाःशीतहाज्वरादयः॥ ९८॥ इतिकलिकुंडलः॥ त्रै
यो॥ शांत्यर्थंनिजनाथस्यजपार्थंरणकांक्षिणां॥ यंत्रंमृत्युंजयंनामप्रवक्ष्यामिसमासतः॥ ९९॥ हंसमध्येगतंनाममृ
त्युंजयपुटीकृतं॥ रक्षरक्षसमायुक्तंबाह्येरखात्रयान्वितं॥ १००॥ चवर्गस्यतृतीयोयंबिंदुषट्स्वरभूषितः॥ आद्यंत
सविसर्गश्चमंत्रोयंप्रणवादिकः॥ १०१॥ पद्ममष्टदलंबाह्येजंभाद्यादिगलस्थिताः॥ विदिक्षुप्रणवंपद्मपत्रेषोडश

केबहिः॥१॥स्वराःषोडशहातव्याप्रत्येकंसर्वतोदिशः॥द्वात्रिंशत्पत्रकंपद्मंतद्वात्र्यविनिवेदयेत॥२॥भैरवाद्यास्तेना
लेख्याभैरवीभैरवादिति॥ग्रहासिद्धास्तथानागास्तथावापिदिशाधिपाः॥३॥पीठोपपीठसंयुक्ताःसेत्रपालाष्टकाःष्टकाः
आनयाग्निंवृणंभूर्जेगृहीत्वातुरुशोभनं॥४॥वर्णभेदेनसंगृह्यब्राह्मणादिक्रमेणच॥षट्द्रव्यैर्यत्रमाक्षिरव्यसिद्धि
नामसमन्वितं॥५॥सुवर्णमयलेखन्याउत्तराभिमुखस्थितः॥चंद्रवोरलिखेदत्रयंत्रंमृत्युंजयाभिधं॥अनेनमंत्र
नस्थेनहृत्वालिंगंसुशोभनं॥पंचामृतेनदिव्येनस्नपयेत्सप्तरात्रकं॥पश्चाच्चगुटिकोद्यालेसकंशूलिनंनतः॥८॥
सिद्धिनामयुतंमंत्रंस्मरंतमुच्चैरनतः॥पूजयेद्धूपपुष्पैश्चकर्पूरागरुचंदनैः॥९॥छादयेत्पटवस्त्रेणसप्ताहान्शांतिकं
भवेत्॥मध्वाज्यंगुग्गुलंराळाश्रीपर्णीसिद्धसर्षपाः॥१०॥पद्माकारेणकुंडेनहोमोद्येदशांशतः॥शमीदूर्वासमि
द्भिश्चरुद्राशाभिमुखस्थितः॥मुद्राचरेच्चरीबध्वास्वात्मानंहोमयेन्नतः॥मुच्यतेरोगिणोरोगात्तापात्पापात्पापवर्जितः॥
१२॥पीडामुत्काग्रहाःसर्वेसौम्यतायांतिनिश्चितं॥वैरिणोमित्रतांयांतिप्रसादंकुरुतेप्रभुः॥१३॥मित्राणिमित्रतां
यांतिविलयंयांतिरस्यवः॥शाकिनीभूतवेताळाःपिशाचोरगराक्षसाः॥१४॥ज्वरारूस्यप्रणश्यंतिसर्पाद्याहिकैकांत
राद्यः॥विषंनक्रमतेदेहेस्थावरंचाप्यजंगमं॥१५॥उपविषाणिसर्वाणिनिर्विषाणिभवंतिच॥अभिचारकृतादोषा
येकेचिदत्रभूतले॥१६॥तेसर्वेपिक्षयंयांतिकाष्ठवह्निगतंयथा॥युद्धकालेकृतंयंत्रंविधिनातेनभूपतिः॥१७॥अ
र्चयित्वाविशद्युद्धेत्रिदशैरपिदुर्जयः॥राज्यभ्रष्टोलभेद्राज्यंषण्मासस्यप्रयोगतः॥१८॥अपुत्रोलभतेपुत्रंदुर्भगास्सु
भगाभवेत्॥श्रीवाबाहुशिरकाद्यांधारयंतिचयेनराः॥१९॥कृतारक्षामिमंमंत्रंविघ्नमृत्युविनाशनं॥अप्रकाश्यं
मयाख्यातंलोकानांहितकाम्यया॥किंपुनर्बहुनोक्तेनप्रभावेनप्रयोजनं॥२१॥एतद्यंत्रकृतारक्षात्रैलोक्यंवशमानयेत्
॥युद्धोनेचनदीतीरेस्मशानेशुशोभने॥२२॥क्रूरेशांत्यंत्रेरकोलंतल्लिंगंनिक्षिपेद्भुवि॥२३॥इतिमृत्युंजययंत्रं॥द्र

॥श्रीराम॥
॥४२॥

स्त्रादितुर्यतुर्यस्वंनेत्रापूर्णेदुभागवौ॥एतल्लग्नसमायोगेवृद्धियोगःप्रजायते॥२४॥कुमोरराजकार्यादिशुभंसर्वंनिब

197
1918

ध्यते॥दंयुवास्त्र्यंचविवादंचद्यूतमद्यादिकर्मच॥२५॥युद्धयोगरिघातश्चयद्देशनगरेपिवा॥कुर्यात्कोजानिरारोगक्ष
णेछेदनंकंथा॥२६॥एतेषांसमयायोगेनघातोजीवयत्स्फुटं॥विघातंसर्वकार्याणांशोभनानांविशेषतः॥२७॥नष्टं
नदृश्यतेवस्तुरोगग्रस्तोनजीवति॥ऋणेनदृश्यतेनस्यपरद्रव्यनगृह्यते॥२८॥घातोदंडास्त्रमुसलैःकर्तव्यश्चारिमं
डलेयत्स्थानेविध्यतेकोडनचनतुनरुद्भवेत्॥२९॥यंत्रनाम्राक्रियतेघातस्तस्यमृत्युर्नसंशयः॥विष्कंभेकाष्टयाघा
तपरिघपरिघस्तं॥गंडेतुगंडपाषाणैःशूलेशूलेनपातयेत्॥धृतियोगपाशवधैःव्याघातक्षुरिकादिभिः॥३३॥हर्ष
णेहरतेकिंचिद्वृद्धिंचंद्राग्निभिस्तथा॥वैधृतेचव्यतीपातेघातस्यात्सर्वतोमुखः॥३२॥एतेसर्वेद्विधाघातायंत्रेघातंप्र
कारयेत्॥द्वेपज्ञानंनरेंद्राणांघातचक्रंप्रजायते॥३३॥ऊर्ध्वगाःपंचरेखास्यस्तीर्यग्रेखाश्चतुर्मताः॥एकैकांकोणगां
स्त्र्यात्घातचक्रंप्रजायते॥३४॥ऊर्ध्वरेखाद्वितीयायांतुर्यायांशूलकद्वयं॥अधस्त्रिशूलंमध्यायांसूर्यभादिशकोण
तः॥३५॥आदिशूलेहिनर्क्षेचरिपोर्हत्याकरंतथा॥आत्मघातोद्वितीयेस्मिन्तृतीयेशूलभयोरपि॥३८॥कोणशू
छुरिकाघातःस्यादन्यत्रशुभावहः॥रविवेधेनृपाद्घातोग्रामवेधेतुमध्यतः॥३७॥राहो
र्विषंप्रयोगेणशनेर्लोहनमृत्युदः॥क्रूरेस्तीक्ष्णेस्तथामिश्रेवृद्धियोगप्रजायते॥३८॥
मृत्युयोगष्पधिस्थित्वाजन्मर्क्षेचैकनाडिके॥उपग्रहव्यतीपातेवैधृतेपरिघेतथा॥३९॥
संक्रांतोदुष्टयोगेचंद्रेजन्मर्क्षगेपिवा॥पंचदशेथद्वाविंशेधिष्ण्यघातस्तुमृत्युदः॥अ
ष्टम्यांचचतुर्दश्यांगुरुमंदमहिसुताः॥समायोगेयदापश्यन्नक्षत्रंक्रूरसंज्ञिकात्रयं॥४१
तस्मिन्कालेभवेद्घातंक्रांतंतंहिसुदारुणं॥इतिघातः॥उपघातःप्रकर्तव्योयोगेःपूर्वो
क्तितस्तनः॥४२॥वामपादास्थिसेगृह्यकुजवारेमृतस्यच॥न्यस्तंपादेतथाहारेमारयेन्मृ
त्युगागतः॥४३॥श्यामसिंहस्यवामांगंगृह्णीयात्खंडपार्श्वसा॥शत्रोर्नामलिखेत्तस्यां

खदिरांगारतापितां॥४४॥ज्वरविस्फोटदोषेण सप्ताहान्मारयेदरीन्॥ अपूज्यशिवभूमिस्थां मिष्टकामभिमंत्रयेत्
॥४५॥रक्तवस्त्रगृहेस्थित्वाऽक्रवमुद्वसकारिणी॥समिधः कण्टिवृक्षस्य ग्राम्यमंत्रेण होमयेत्॥४६॥अष्टोत्तरशतंतेन
नश्यन्मृत्युः प्रजायते॥अज्ञातकस्यसमिधः फल्गन्यष्टोत्तरंशतं॥शत्रुनाम्नाहुतंहंनिक्षिप्तःकीलोयशाल्मकः
॥षड्वारेणहनुमन्मंत्राद्राजिकालवणंतुषं॥४८॥नेत्रंत्यास्यः साष्टशतंहुत्वाशत्रुंविनाशयेत्॥सर्षपागृहधूमं
चसर्पनिर्मोकसंयुतं॥४९॥त्रिकोणमंडलेजुह्वन्शत्रुंघातयतेध्रुवं॥निर्मांस्यलवणंकुष्मघोरेणहुतंरिपुं॥५०
सप्ताहान्मारयत्येवंदूर्वाहोमादिजीवयेत्॥अग्रेघातंतुवक्तव्यंपश्चाद्युद्धंसमारभेत्॥५१॥विनाघातेनवैयु
द्धंजयोनास्तिकदाचने॥५२॥ ॥इत्यकपघातः॥ ॥इतिश्रीनरपतिजयचर्यास्वरोदयेषडंगसप्ताध्यायेब
लाबलाध्यायःपंचमःसमाप्तः॥५॥ ॥ ॥ ॥घोरगूढसूर्यकालानलाख्यचांद्रेचक्रेकालचक्रेफणी
श॥युद्धयोद्राजन्मसूर्येदुहीनःकौमारवायुनियुद्धंविदध्यात्॥ ॥चक्राणि॥८४॥६०२॥भूबलानि॥
८४॥९७॥ग्रंथ॥१५१५॥२०००॥ ॥श्रीसीतारामचंद्रार्पणमस्तु॥ ॥श्रीशुभंभवतु॥ ॥श्रीरस्तु॥ ॥

॥श्रीराम॥
॥४३॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

॥इतीनरपतिजयचर्यासमाप्तः॥